

# भज गोविन्दं

भज-गो विन्दं  भज-गो विन्दं
गोविन् दं-भज मूढ मते
संप्राप् ते-सन् निहिते काले
नहिनहि रक्षति डुकृञ् करणे १

मूढ जहीहि धनागम तृष्णां
कुरुसद् बुद्धिं मनसि वितृष्णाम्
यल्लभ सेनिज कर्मो पात्तं
वित्तं तेन विनोदय चित्तम् २

नारी स्तनभर नाभी देशं
दृष्ट्वा मागा मोहा वेशम्
एतन् मांसा वसादि विकारं
मनसि विचिन्तय वारं वारम् ३

नलिनी दलगत जलमति तरलं
तद्वज् जीवित मतिशय चपलम्
विद्धि व्याध्-यभि मानग् रस्तं
लोकं शोकह तंच-स मस्तम् ४

यावद् वित्तो पार्जन सक्तः
स्तावन् निज-परि वारो रक्तः
पश्चाज् जीवति जर्जर देहे
वार्तां कोऽपिन पृच्छति गेहे ५

यावत् पवनो निवसति देहे
तावत् पृच्छति कुशलं गेहे
गतवति वायौ देहा पाये
भार्या बिभ्यति तस्मिन् काये ६

बालस् तावत् क्रीडा सक्तः
तरुणस् तावत् तरुणी सक्तः
वृद्धस् तावच् चिन्ता सक्तः
परमे ब्रह्मणि कोऽपिन सक्तः ७

काते कान्ता कस्ते पुत्रः
संसा रोऽयम तीव विचित्रः
कस्य त्वंकः कुत आयातः
तत्त्वं चिन्तय तदिह भ्रातः ८

सत्सङ् गत्वे निस्सङ् गत्वं
निस्सङ् गत्वे निर्मो हत्वम्
निर्मो हत्वे निश्चल तत्त्वं
निश्चल तत्त्वे जीवन् मुक्तिः ९

वयसि गतेकः काम विकारः
शुष्के नीरे कःका सारः
क्षीणे वित्ते कःपरि वारः
ज्ञाते तत्त्वे कः-सं सारः १०

माकुरु धन-जन यौवन गर्वं
हरति निमेषात् कालः सर्वम्
माया मयमिद मखिलं बुध्वा
ब्रह्म पदं-त्वं प्रविश विदित्वा ११

दिनया मिन्यौ सायं प्रातः
शिशिर वसन्तौ पुनर् आयातः
कालः क्रीडति गच्छत् यायुः
तदपि नमुञ्चत् याशा वायुः १२

काते कान्ता धन-गत चिन्ता
वातुल किं-तव नास्ति नियन्ता
त्रिजगति सज्जन सं-गति रेका
भवति भवार्णव तरणे नौका १३

जटिलो मुण्डी लुञ्छित केशः
काषा याम्बर बहुकृत वेषः
पश्यन् नपि-चन पश्यति मूढः
उदर निमित्तं बहुकृत-अ वेषः
१४

अङ्गं गलितं पलितं मुण्डं
दशन विहीनं जाटं तुण्डम्
वृद्धो याति गृहीत्वा दण्डं
तदपि नमुञ्चत् याशा पिण्डम् १५

अग्रे वह्निः पृष्ठे भानुः
रात्रौ चुबुकस मर्पित जानुः
करतल भिक्षस् तरुतल वासः
तदपि नमुञ्चत् याशा पाशः १६

कुरुते गङ्गा सागर गमनं
व्रतपरि पालन मथवा दानम्
ज्ञान विहिनः सर्वम तेन
भजति न-मुक्तिं जन्मश तेन १७

सुर-मं दिर-तरु मूल निवासः
शय्या भूतल मजिनं वासः
सर्व परिग्रह भोग त्यागः
कस्य सुखं-न करोति विरागः
१८

योगर तो-वा भोगर तो-वा
सङ्गर तो-वा सङ्ग विहीनः
यस्य ब्रह्मणि रमते चित्तं
नन्दति नन्दति नन्दत् येव १९

भगवद् गीता किञ्चिद धीता
गङ्गा जललव कणिका पीता
सकृदपि येन मुरारि समर्चा
क्रियते तस्यय मेन-न चर्चा २०

पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरे शयनम्
इह-सं सारे बहुदुस् तारे
कृपया ऽपारे पाहि मुरारे २१

रथ्या चर्पट विरचित कन्थः
पुण्या पुण्य विवर्जित पन्थः
योगी योग नि-योजित चित्तो
रमते बालोन् मत्तव देव २२

कस्त्वं कोऽहं कुत-आ यातः
का-मे जननी को-मे तातः
इति-परि भावय सर्वम सारम्
विश्वं त्यक्त्वा स्वप्न विचारम् २३

त्वयि-मयि चान्य त्रैको विष्णुः
व्यर्थं कुप्यसि मय्यस-अ हिष्णुः
भव-सम चित्तः सर्वत् र-त्वं
वाञ्छस् यचिराद् यदि-विष्
णुत्वम् २४

शत्रौ मित्रे पुत्रे बन्धौ
मा-कुरु यत्नं विग्रह सन्धौ
सर्वस् मिन्नपि पश्यात् मानं
सर्वत् रोत्सृज भेदा ज्ञानम् २५

कामं क्रोधं लोभं मोहं
त्यक्त्वाऽत् मानं पश्यति सोऽहम्
आत्म ज्ञान विहीना मूढाः
ते-पच् यन्ते नरक निगूढाः २६

गेयं गीता नाम सहस्त्रं
ध्येयं श्रीपति रूपम्-अ जस्त्रम्
नेयं सज्जन सङ्गे चित्तं
देयं दीनज नाय-च वित्तम् २७

सुखतः क्रियते रामा भोगः
पश्चाद् धन्त शरीरे रोगः
यद्यपि लोके मरणं शरणं
तदपिन मुञ्चति पापा चरणम् २८

अर्थम्-अ नर्थं भावय नित्यं
नास्ति ततः-सुख लेशः सत्यम्
पुत्रा दपिधन भाजां भीतिः
सर्व त्रैषा विहिता रीतिः २९

प्राणा यामं प्रत्या हारं
नित्या नित्य विवेक विचारम्
जाप्य समेत समाधि विधानं
कुर्व-अव धानं महद्-अव धानम्
३०

गुरु-चर णाम्बुज निर्भर भकतः
संसा राद्-अचि राद्भव मुक्तः
सेन्द्रिय मानस नियमा देवं
द्रक्ष्यसि निज-हृद यस्थं देवम्
३१

द्वादश मञ्जरि काभिर शेषः
कथितो वैया करणस् यैषः
उपदेशो भूद्वि द्यानि पुणैः
श्रीमच् छन्कर भगवच् हरणैः




18 bhajagovindam 060329